प्रेमालिङ्गनं, क्ली, (प्रेम्णा यदालिङ्गनम् ।) स्नेहेन परिष्वङ्गः । नायकनायिकयोरालिङ्गनविशेषः । तल्लक्षणं यथा । नायककटिं नायिकयैकपादेन वेष्टयित्वा द्वितीयं पादं तस्य जङ्घोपरि स्थापयित्वा यदालिङ्गनं तत् । इति कामशास्त्रम् ॥

प्रेमी, [न्] त्रि, (प्रेम अस्यास्तीति । इनिः ।) प्रेमयुक्तः । स्नेहविशिष्टः । प्रेमशब्दादस्त्यर्थे इनुप्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

प्रेयसी, स्त्री, (इयमनयोरतिशयेन प्रिया । प्रिय+ ईयसुन् । "प्रियस्थिरेति ।" ६ । ४ । १५७ । इपि प्रादेशः । स्त्रियां ङीप् ।) प्रियतमा नारी । तत्पर्य्यायः । दयिता २ कान्ता ३ प्राणेशा ४ वल्लभा ५ प्रिया ६ हृदयेशा ७ प्राणसमा ८ प्रेष्ठा ९ प्रणयिनी १० । इति हेमचन्द्रः ॥

प्रेयान् [स्] पुं, (अयमनयोरतिशयेन प्रियः । प्रिय+ईयसुन् । प्रादेशः ।) पतिः । तत्पर्य्यायः । दयितः २ कान्तः ३ प्राणेशः ४ वल्लभः ५ प्रियः ६ हृदयेशः ७ प्राणसमः ८ प्रेष्ठः ९ प्रणयी १० । इति हेमचन्द्रः ॥ अतिप्रिये, त्रि । इति जटाधरः ॥

प्रेरणं, क्ली, (प्र+ईर्+णिच्+ल्युट् ।) प्रेषणम् । पाठान इति भाषा । यथा, नैषधे । ३ । ५५ ।

"धिक् चापले वत्सिमवत्सलत्वं
यत्प्रेरणादुत्तरलीभवन्त्या ॥"

प्रेरणा, स्त्री, (प्र+ईर्+णिच्+"ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् ।) चोदना । (यथा, मेघदूते । ७० ।

"स्त्रीमूढानां भवति विफला प्रेरणा चूर्णमुष्टिः ॥")

फलभावना । विधिरिति यावत् । इति धर्म्मदीपिका ॥

प्रेरितः, त्रि, (प्र+ईर्+क्तः ।) प्रेषितः । यथा,—

"नपुंसकमिति ज्ञात्वा प्रियायै प्रेरितं मनः ।
मनस्तत्रैव रमते हताः पाणिनिना वयम् ॥"
इति प्राचीनाः ॥

प्रेर्व्वा [न्] पुं, (प्रकर्षेण ईर्त्ते इति । प्र+ईर् गतौ +"प्र ईरशदोस्तुट् च ।" उणा० ४।११६। इति क्वनिप् तुडागमश्च ।) समुद्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

प्रेर्व्वरी, स्त्री, (प्रकर्षेण ईर्त्ते इति । प्र+ईर् गतौ+"प्र ईरशदोस्तुट् च ।" उणा० ४।११६। इति क्वनिप् तुट् च । "वनोरच ।"४ । १ । ७। इति ङीप् रश्चान्तादेशः ।) नदी । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

प्रेव, ऋ गतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ॥)

प्रेषः, पुं (प्र+ईष्+घञ् ।) प्रेषणम् । पीड़ा । इति जटाधरः ॥

प्रेषणं, क्ली, (प्रेष्+भावे ल्युट् ।) प्रेरणम् । यथा,

"जानीयात् प्रेषणे भृत्यान् बान्धवान् व्यसनागमे।
मित्रञ्चापदि काले च भार्य्याञ्च विभवक्षये ॥"
इति चाणक्यसंग्रहः ॥

प्रेषितं, त्रि, (प्रेष्+क्तः ।) प्रेरितम् । तत्पर्य्यायः । प्रस्थापितम् २ प्रतिशिष्टम् ३ प्रतिहृतम् ४ । इति हेमचन्द्रः ॥ (यथा, देवीभागवते ।१।११।४६।

"प्रेषितोऽहं महाभाग! शक्रेण त्वां विवञ्चया ।
कथितं प्रभुणा यच्च तद्ब्रवीमि महामते ! ॥")

प्रेष्ठः, त्रि, (अयमेषामतिशयेन प्रिय इति । प्रिय +इष्ठन् । प्रादेशः ।) अतिशयप्रियः । इत्यमरः । ३ । १ । १११ ॥

प्रेष्ठा, स्त्री, (प्रेष्ठ+टाप् ।) प्रेयसी । इति हेमचन्द्रः ॥ जङ्घा । इति शब्दचन्द्रिका ॥

प्रेष्यः, त्रि, (प्र+ईष्+कर्म्मणि ण्यत् ।) दासः । इत्यमरः ।२।१०।१७ ॥ (यथा, मनौ । ३।१५३ ।

"प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः ॥")

प्रेरणीयश्च ॥

प्रैषः, पुं, (प्र+इष्+घञ् । "प्रादूहोढोढ्येषैष्येषु ।" ६।१।८९। इत्यस्य वार्त्तिकोक्त्या वृद्धिः ।) क्लेशः । मर्द्दनम् । उन्मादः । प्रेषणम् । इति मेदिनी । षे, ९ ॥

प्रैष्यः, पुं, (प्र+इष्+कर्म्मणि ण्यत् । "प्रादूहोढोढ्येषैष्येषु ।" ६ । १ । ८९ । इत्यस्य वार्त्तिकोक्त्या वृद्धिः ।) प्रेष्यः । इत्यमरटीकायां भरतः ॥ (यथा, कुमारे । ६ । ५८ ।

"जङ्गमं प्रैष्यभावे वः स्थावरं चरणाङ्कितम् ।
विभक्तानुग्रहं मन्ये द्विरूपमपि मे वपुः ॥"

क्ली, प्रैष्यस्य भावः । दासकर्म्म । यथा, कथासरित्सागरे । ३० । ९५ ।

"गवादिरक्षकान् पुत्त्रान् भार्य्यां कर्म्मकरीं
निजाम् ।
तस्य कृत्वा गृहाभ्यर्णे प्रैष्यं कुर्व्वन्नुवास सः ॥")

प्रोक्तं, त्रि, (प्रकर्षेण उच्यते स्मेति । प्र+वच्+ क्तः ।) कथितम् । प्रकर्षेणोक्तम् । यथा,—

"अम्बरीषशुकप्रोक्तं नित्यं भागवतं शृणु ॥"
इति श्रीभागवतम् ॥

प्रोक्षणं, क्ली, (प्र+उक्ष सेचने+ल्युट् ।) यज्ञार्थपशुहननम् । इत्यमरः । २ । ७ । २६ ॥ (यथा, महाभारते । ५ । १७ । ९ ।

"य इमे ब्राह्मणाः प्रोक्ता मन्त्रा वै प्रोक्षणे
गवाम् ।
एते प्रमाणं भवतः उताहो नेति वासव ! ॥"

मन्त्राद्युचितसंस्कारः । यथा, भागवते । ९ । ६ । ८ ।

"चोदितः प्रोक्षणायाह दुष्टमेतदकर्म्मकम् ॥")

वधः । सेचनम् । इति मेदिनी । णे, ६४ ॥ (यथा, मनुः । ५ । ११८ ।

"अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम् ।
प्रक्षालनेन त्वल्पानामद्भिः शौचं विधीयते ॥")

प्रोक्षितं, त्रि, (प्र+उक्ष+क्त ।) निहतम् । सिक्तम् । इति मेदिनी । ते, १३६ ॥ यज्ञार्थे मन्त्रैः संस्कृतमांसादि । यथा,—

"भक्षयेत् प्रोक्षितं मांसं सकृद्ब्राह्मणकाम्यया ।
दैवे नियुक्तः श्राद्धे वा नियमे तु विवर्ज्जयेत् ॥"

आरण्यानामिदानीन्तनप्रोक्षणापेक्षा नास्ति । यथा, महाभारते ।

"आरण्याः सर्व्वदैवत्याः प्रोक्षिताः सर्व्वशो
मृगाः ।
अगस्त्येन पुरा राजन् ! मृगया येन पूज्यते ॥"
इति तिथ्यादितत्त्वम् ॥

प्रोज्ञासनं, क्ली, (प्र+उद्+नस् हिंसायाम्+ णिच्+ल्युट् ।) मारणम् । इति हेमचन्द्रः । ३ । ३४ ॥

प्रोज्झितं, त्रि, (प्र+उज्झ+कर्म्मणि क्तः ।) त्यक्तम् । यथा, श्रीभागवते । १ । १ । २ ।

"धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सताम् ॥"

प्रोञ्छनं, क्ली, (प्र+उञ्छ+ल्युट् ।) प्रवर्जनम् । लोपनम् । मोछा इति भाषा ॥ यथा,—

"प्रोञ्छनैर्वामपादेन दरिद्रो भवति ध्रुवम् ।
वैरिनाशकरं प्रोक्तं कवचं वश्यकारकम् ॥"
इति रुद्रयामले वैरिहरकालीकवचम् ॥

प्रोष्ठः, पुं, (प्रकर्षेण अष्ठते निष्ठीवनादिकं प्राप्नोतीति । प्र+अठि गतौ+अच् । पृषोदरादित्वात् अस्य उत्वम् ।) पतद्ग्रहः । पीकदान इति भाषा । यथा,—

"स्यादाचमनकः प्रोष्ठः कटकोलः पतद्ग्रहः ॥"
इति हारावली । ४७ ॥

प्रोतं, क्ली, (प्र+वेञ् स्यूतौ+क्तः । यजादित्वात् सम्प्रसारणम् ।) वस्त्रम् । इति जटाधरः ॥

प्रोतं, त्रि, (प्र+वेञ्+क्तः । यजादित्वात् सम्प्रसारणम् ।) खचितम् । इति मेदिनी । ते, २७ ॥ स्यूतम् । (यथा, श्रीकण्ठचरिते । १५ । २५ ।

"गौरम्बुमात्तपरिरम्भविजृम्भणस्य
रम्भोरुभिः सह विलासिजनस्य कामः ।
प्रोतं विधातुमिव चेतसि रागसूत्रं
रोमाञ्चसूचिनिचयं प्रचुरीचकार ॥")

गुम्फितम् । इति हेमचन्द्रः ॥

प्रोतोत्सादनं, क्ली, (प्रोते स्यूते सति प्रोनानां वस्त्राणां वा उत्सादनं उत्तोलनं उच्चालनं वा यत्र ।) वस्त्रकुट्टिमम् । छत्रम् । इति त्रिकाण्डशेषः ॥

प्रोत्फलः, पुं, (प्रकर्षेण उत्फलतीति । प्र+ उत्+फल्+अच् ।) इक्षुविशेषः । तत्पर्य्यायः । विंशत्यङ्गुलः २ छटी ३ छटा ४ पिञ्जा ५ । इति शब्दमाला ॥

प्रोत्फुल्लं, त्रि, (प्रकर्षेण उत्फुल्लन् । प्र+उत्+ फुल्ल विकासे+कर्त्तरि अच् वा ।) विकसितम् । यथा,—

"ये वर्द्धिताः करिकपोलमदेन भृङ्गाः
प्रोत्फुल्लपङ्कजरजःसुरभीकृताङ्गाः ।
ते साम्प्रतं विधिवशात् क्रमयन्ति कालं
निम्बेषु चार्कसुमेषु करीलकेषु ॥"
इति भामिनीविलासः ॥

प्रोत्साहः, पुं, (प्र+उत्+सह+घञ् ।) प्रकृष्टोत्साहः । "कर्म्मसु सुकरप्रत्यय उत्साह इति मधुः ॥ कर्म्मसु दृढ़यत्नकारको भावः उत्साह